# Aghora Murti Sahasranama Stotram

# અઘોરમૂર્તિસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : aghoramUrtisahasranAmastotram 1

File name : aghoramUrtisahasranAmastotram.itx

Category : shiva, sahasranAma

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran

Latest update : January 5, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# અઘોરમૂર્તિસહસ્રનામસ્તોત્રમ્

અથ અઘોરમૂર્તિસહસ્રનામ લિખ્યતે -
ૐ શ્રીં હ્રીં ક્લીં સૌઃ ક્ષ્મીં ઘોર ઘોરાય જ્વલ જ્વલ
પ્રજ્વલ પ્રજ્વલ અઘોરાસ્ત્રાય ફટ્ સ્વાહા ।
। ઇતિ મૂલમ્ ।
શ્રીભૈરવી ઉવાચ -
ભગવન્સર્વધર્મજ્ઞ વિશ્વાભયવરપ્રદ ।
સર્વેશ સર્વશાસ્ત્રજ્ઞ સર્વાતીત સનાતન ॥ ૧॥

ત્વમેવ પરમં તત્ત્વં ત્વમેવ પરમં પદમ્ ।
ત્વત્તોઽપ્યન્યં ન પશ્યામિ સારં સારોત્તમોત્તમમ્ ॥ ૨॥

પુરાઽસ્માકં વરો દત્તો દેવદાનવસઙ્ગરે ।
તદદ્ય કૃપયા શમ્ભો વરં નાથ પ્રયચ્છ મે ॥ ૩॥

શ્રીભૈરવ ઉવાચ -
ભૈરવિ પ્રેયસિ ત્વં મે સત્યં દત્તો વરો મયા ।
યદદ્ય મનસાભીષ્ટં તદ્યાચસ્વ દદામ્યહમ્ ॥ ૪॥

શ્રીદેવી ઉવાચ -
શ્રીશિવઃ પરમાત્મા ચ ભૈરવોઽઘોરસંજ્ઞકઃ ।
ત્રિગુણાત્મા મહારુદ્રસ્ત્રૈલોક્યોદ્ધરણક્ષમઃ ॥ ૫॥

તસ્ય નામસહસ્રં મે વદ શીઘ્રં કૃપાનિધે ।
વરમેતન્મહાદેવ દેહિ સત્યં મદીપ્સિતમ્ ।
અસ્માદ્વરં ન યાચેઽહં દેહિ ચેદસ્તિ મે દયા ॥ ૬॥

શ્રીભૈરવ ઉવાચ -
શૃણુષ્વૈકાન્તભૂદેશે સાનૌ કૈલાસભૂભૃતઃ ।
દેવદાનવસઙ્ગ્રામે યત્તે દત્તો વરો મયા ।

વરં તત્તે પ્રયચ્છામિ ચાન્યદ્વરય મે વરમ્ ॥ ૭॥

શ્રીદેવી ઉવાચ -
અતઃ પરં ન યાચેઽહં વરમન્યન્મહેશ્વર ।
કૃપયા કરુણામ્ભોધે વદ શીઘ્રં સુરાર્ચિત ॥ ૮॥

શ્રીભૈરવ ઉવાચ -
તવ ભક્ત્યા બ્રવીમ્યદ્ય અઘોરસ્ય મહાત્મનઃ ।
નામ્નાં સહસ્રં પરમં ત્રૈલોક્યોદ્ધરણક્ષમમ્ ॥ ૯॥

નાતઃ પરતરા વિદ્યા નાતઃ પરતરઃ સ્તવઃ ।
નાતઃ પરતરં સ્તોત્રં સર્વસ્વં મમ પાર્વતિ ॥ ૧૦॥

અકારાદિ ક્ષકારાન્તા વિદ્યાનિધિમનુત્તમમ્ ।
બીજમન્ત્રમયં ગોપ્યં ગોપ્તવ્યં પશુસઙ્કટે ॥ ૧૧॥

ૐ અસ્ય શ્રીઅઘોરમૂર્તિનામસહસ્રસ્ય શ્રીમહાકાલભૈરવ ઋષિઃ,
પઙ્ક્તિ છન્દઃ, અઘોરમૂર્તિઃ પરમાત્મા દેવતા ।
ૐ બીજં, હ્રીં શક્તિઃ, કુરુ કુરુ કીલકમ્ ।
અઘોર વિદ્યાસિદ્ધ્યર્થે જપે પાઠે વિનિયોગઃ ।

અથ ન્યાસઃ -
હ્રાં અઙ્ગુષ્ઠભ્યાં નમઃ ।
હ્રીં તર્જનીભ્યાં નમઃ ।
હ્રૂં મધ્યમાભ્યાં નમઃ ।
હ્રૈં અનામિકાભ્યાં નમઃ ।
હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિ ષડઙ્ગન્યાસઃ ।
અપિ ચ-
ૐ નમો ભગવતે અઘોરાય શૂલપાણયે સ્વાહા હૃદયાય નમઃ ।
રુદ્રાયામૃતમૂર્તયે માં જીવય જીવય શિરસે સ્વાહા ।
નીલકણ્ઠાય ચન્દ્રજટિને શિખાયૈ વષટ્ ।
ત્રિપુરાન્તકાય કવચાય હુમ્ ।
ત્રિલોચનાય ઋગ્યજુઃસામમૂર્તયે નેત્રાભ્યાં વૌષટ્ ।
રુદ્રાયાગ્નિત્રયાય જ્વલ જ્વલ માં રક્ષ રક્ષ

અઘોરાસ્ત્રાય હું ફટ્ સ્વાહા । અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિ ષડઙ્ગન્યાસઃ એવં કરન્યાસઃ ।
ભૂર્ભુવઃ સ્વરિતિ દિગ્બન્ધઃ ।

અથ ધ્યાનમ્ ।
શ્રીચન્દ્રમણ્ડલગતામ્બુજપીતમધ્યે
    દેવં સુધાસ્રવિણમિન્દુકલાધરં ચ ।
શુદ્ધાક્ષસૂત્રકલશામૃતપદ્મહસ્તં
    દેવં ભજામિ હૃદયે ભુવનૈકનાથમ્ ॥

અપિ ચ -
મહાકાયં મહોરસ્કં મહાદંશં મહાભુજમ્ ।
સુધાસ્યં શશિમૌલિં ચ જ્વાલાકેશોર્ધ્વબન્ધનમ્ ॥

કિઙ્કિણીમાલયા યુક્તં સર્પયજ્ઞોપવીતિનમ્ ।
રક્તામ્બરધરં દેવં રક્તમાલાવિભૂષિતમ્ ।
પાદકિઙ્કિણીસઞ્છન્નં નૂપુરૈરતિશોભિતમ્ ॥

ધ્યાનમાર્ગસ્થિતં ઘોરં પઙ્કજાસનસંસ્થિતમ્ ।
ભજામિ હૃદયે દેવં દેવં ચાઘોરભૈરવમ્ ॥

। ઇતિ ધ્યાનમ્ ।
અથ મૂલમન્ત્રઃ ।
અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરેભ્યઃ ।
સર્વતઃ સર્વસર્વેભ્યો નમસ્તે રુદ્રરૂપેભ્યઃ ॥

। ઇતિ મૂલમ્ ।
અથ અઘોરાય નમઃ ।
ૐ હ્રીં શ્રીં ક્લીં મહારુદ્રો ગ્લૌં ગ્લાં અઘોરભૈરવઃ ।
ક્ષ્મીં કાલાગ્નિઃ કલાનાથઃ કાલઃ કાલાન્તકઃ કલિઃ ॥ ૧॥

શ્મશાનભૈરવો ભીમો ભીતિહા ભગવાન્પ્રભુઃ ।
ભાગ્યદો મુણ્ડહસ્તશ્ચ મુણ્ડમાલાધરો મહાન્ ॥ ૨॥

ઉગ્રોગ્રરવોઽત્યુગ્ર ઉગ્રતેજાશ્ચ રોગહા ।
રોગદો ભોગદો ભોક્તા સત્યઃ શુદ્ધઃ સનાતનઃ ॥ ૩॥

ચિત્સ્વરૂપો મહાકાયો મહાદીપ્તિર્મનોન્મનઃ ।

માન્યો ધન્યો યશસ્કર્તા હર્તા ભર્ત્તા મહાનિધિઃ ॥ ૪॥

ચિદાનન્દશ્ચિદાકારશ્ચિદુલ્લાસશ્ચિદીશ્વરઃ ।
ચિન્ત્યોઽચિન્ત્યોઽચિન્ત્યરૂપઃ સ્વરૂપો રૂપવિગ્રહી ॥ ૫॥

ભૂતેભ્યો ભૂતિદો ભૂત્યં ભૂતાત્મા ભૂતભાવનઃ ।
ચિદાનન્દઃ પ્રકાશાત્મા સનાત્માબોધવિગ્રહઃ ॥ ૬॥

હૃદ્બોધો બોધવાન્ બુદ્ધો બુદ્ધિદો બુદ્ધમણ્ડનઃ ।
સત્યપૂર્ણઃ સત્યસન્ધઃ સતીનાથઃ સમાશ્રયઃ ॥ ૭॥

ત્રૈગુણ્યો નિર્ગુણો ગુણ્યોઽગ્રણીર્ગુણવિવર્જિતઃ ।
સુભાવઃ સુભવઃ સ્તુત્યઃ સ્તોતા શ્રોતા વિભાકરઃ ॥ ૮॥

કાલકાલાન્ધકત્રાસકર્તા હર્તા વિભીષણઃ ।
વિરૂપાક્ષઃ સહસ્રાક્ષો વિશ્વાક્ષો વિશ્વતોમુખઃ ॥ ૯॥

ચરાચરાત્મા વિશ્વાત્મા વિશ્વબોધો વિનિગ્રહઃ ।
સુગ્રહો વિગ્રહો વીરો ધીરો ધીરભૃતાં વરઃ ॥ ૧૦॥

શૂરઃ શૂલી શૂલહર્તા શઙ્કરો વિશ્વશઙ્કરઃ ।
કઙ્કાલી કલિહા કામી હાસહા કામવલ્લભઃ ॥ ૧૧॥

કાન્તારવાસી કાન્તાસ્થઃ કાન્તાહૃદયધારણઃ ।
કામ્યઃ કામ્યનિધિઃ કાન્તાકમનીયઃ કલાધરઃ ॥ ૧૨॥

કલેશઃ સકલેશશ્ચ વિકલઃ શકલાન્તકઃ ।
શાન્તો ભ્રાન્તો મહારૂપી સુલભો દુર્લભાશયઃ ॥ ૧૩॥

લભ્યોઽનન્તો ધનાધીનઃ સર્વગઃ સામગાયનઃ ।
સરોજનયનઃ સાધુઃ સાધૂનામભયપ્રદઃ ॥ ૧૪॥

સર્વસ્તુત્યઃ સર્વગતિઃ સર્વાતીતોઽપ્યગોચરઃ ।
ગોપ્તા ગોપ્તતરો ગાનતત્પરઃ સત્યપરાયણઃ ॥ ૧૫॥

અસહાયો મહાશાન્તો મહામૂર્તો મહોરગઃ ।
મહતીરવસન્તુષ્ટો જગતીધરધારણઃ ॥ ૧૬॥

ભિક્ષુઃ સર્વેષ્ટફલદો ભયાનકમુખઃ શિવઃ ।
ભર્ગો ભાગીરથીનાથો ભગમાલાવિભૂષણઃ ॥ ૧૭॥

જટાજૂટી સ્ફુરત્તેજશ્ચણ્ડાંશુશ્ચણ્ડવિક્રમઃ ।
દણ્ડી ગણપતિર્ગુણ્યો ગણનીયો ગણાધિપઃ ॥ ૧૮॥

કોમલાઙ્ગોઽપિ ક્રૂરાસ્યો હાસ્યો માયાપતિઃ સુધીઃ ।
સુખદો દુઃખહા દમ્ભો દુર્જયો વિજયી જયઃ ॥ ૧૯॥

જયોઽજયો જ્વલત્તેજો મન્દાગ્નિર્મદવિગ્રહઃ ।
માનપ્રદો વિજયદો મહાકાલઃ સુરેશ્વરઃ ॥ ૨૦॥

અભયાઙ્કો વરાઙ્કશ્ચ શશાઙ્કકૃતશેખરઃ ।
લેખ્યો લિપ્યો વિલાપી ચ પ્રતાપી પ્રમથાધિપઃ ॥ ૨૧॥

પ્રખ્યો દક્ષો વિમુક્તશ્ચ રુક્ષો દક્ષમખાન્તકઃ ।
ત્રિલોચનસ્ત્રિવર્ગેશઃ ત્રિગુણી ત્રિતયીપતિઃ ॥ ૨૨॥

ત્રિપુરેશસ્ત્રિલોકેશસ્ત્રિનેત્રસ્ત્રિપુરાન્તકઃ ।
ત્ર્યમ્બકસ્ત્રિગતિઃ સ્વક્ષો વિશાલાક્ષો વટેશ્વરઃ ॥ ૨૩॥

વટુઃ પટુઃ પરં પુણ્યં પુણ્યદો દમ્ભવર્જિતઃ ।
દમ્ભી વિલમ્ભી વિષેભિસ્સંરમ્ભી સઙ્ગ્રહી સખા ॥ ૨૪॥

વિહારી ચારરૂપશ્ચ હારી માણિક્યમણ્ડિતઃ ।
વિદ્યેશ્વરો વિવાદી ચ વાદભેદ્યો વિભેદવાન્ ॥ ૨૫॥

ભયાન્તકો બલનિધિર્બલિકઃ સ્વર્ણવિગ્રહઃ ।
મહાસીનો વિશાખી ચ પૃષટ્કી પૃતનાપતિઃ ॥ ૨૬॥

અનન્તરૂપોઽનન્તશ્રીઃ ષષ્ટિભાગો વિશામ્પતિઃ ।
પ્રાંશુઃ શીતાંશુર્મુકુટો નિરંશઃ સ્વાંશવિગ્રહઃ ॥ ૨૭॥

નિશ્ચેતનો જગત્રાતા હરો હરિણસમ્ભૃતઃ ।
નાગેન્દ્રો નાગત્વગ્વાસાઃ શ્મશાનાલયચારકઃ ॥ ૨૮॥

વિચારી સુમતિઃ શમ્ભુઃ સર્વઃ ખર્વોરુવિક્રમઃ ।
ઈશઃ શેષઃ શશી સૂર્યઃ શુદ્ધસાગર ઈશ્વરઃ ॥ ૨૯॥

ઈશાનઃ પરમેશાનઃ પરાપરગતિઃ પરમ્ ।
પ્રમોદી વિનયી વેદ્યો વિદ્યારાગી વિલાસવાન્ ॥ ૩૦॥

સ્વાત્મા દયાલુર્ધનદો ધનદાર્ચનતોષિતઃ ।
પુષ્ટિદસ્તુષ્ટિદસ્તાર્ક્ષ્યો જ્યેષ્ઠઃ શ્રેષ્ઠો વિશારદઃ ॥ ૩૧॥

ચામીકરોઽવ્યયગતઃ સર્વગઃ સર્વમણ્ડનઃ ।
દિનેશઃ શર્વરીશશ્ચ સન્મદોન્માદદાયકઃ ॥ ૩૨॥

હાયનો વત્સરો નેતા ગાયનઃ પુષ્પસાયકઃ ।
પુણ્યેશ્વરો વિમાનસ્થો વિમાન્યો વિમના વિધુઃ ॥ ૩૩॥

વિધિઃ સિદ્ધિપ્રદો દાન્તો ગાતા ગીર્વાણવન્દિતઃ ।
શ્રાન્તો વાન્તો વિવેકાક્ષો દુષ્ટો ભ્રષ્ટો નિરષ્ટકઃ ॥ ૩૪॥

ચિન્મયો વાઙ્મયો વાયુઃ શૂન્યઃ શાન્તિપ્રદોઽનઘઃ ।
ભારભૃદ્ભૂતભૃદ્ગીતો ભીમરૂપો ભયાનકઃ ॥ ૩૫॥

તચ્ચણ્ડદીપ્તિશ્ચણ્ડાક્ષો દલત્ક્લેશઃ સ્ખલદ્રતિઃ ।
અકારોઽથ નિરાકાર ઇલેશ ઈશ્વરઃ પરઃ ॥ ૩૬॥

ઉગ્રમૂર્તિરુત્સવેશ ઊષ્માંશુરૃણહા ઋણી ।
કલ્લિહસ્તો મહાશૂરો લિઙ્ગમૂર્તિર્લસદ્દૃશઃ ॥ ૩૭॥

લીલાજ્યોતિર્મહારૌદ્રો રુદ્રરૂપો જનાશનઃ ।
એણત્વગાસનો ધૂર્ત્તો ધૂલિરાગાનુલેપનઃ ॥ ૩૮॥

ઐં બીજામૃતપૂર્ણાઙ્ગઃ સ્વર્ણાઙ્ગઃ પુણ્યવર્ધનઃ ।
ૐકારોકારરૂપશ્ચ તત્સર્વો અઙ્ગનાપતિઃ ॥ ૩૯॥

અઃસ્વરૂપો મહાશાન્તઃ સ્વરવર્ણ વિભૂષણઃ ।
કામાન્તકઃ કામદશ્ચ કાલીયાત્મા વિકલ્પનઃ ॥ ૪૦॥

કલાત્મા કર્કશાઙ્ગશ્ચ કારાબન્ધવિમોક્ષદઃ ।
કાલરૂપઃ કામનિધિઃ કેવલો જગતામ્પતિઃ ॥ ૪૧॥

કુત્સિતઃ કનકાદ્રિસ્થઃ કાશીવાસઃ કલોત્તમઃ ।
કામી રામાપ્રિયઃ કુન્તઃ કવર્ણાકૃતિરાત્મભૂઃ ॥ ૪૨॥

ખલીનઃ ખલતાહન્તા ખેટેશો મુકુટાધરઃ ।
ખં ખડ્ગેશઃ ખગધરઃ ખેટઃ ખેચરવલ્લભઃ ॥ ૪૩॥

ખગાન્તકઃ ખગાક્ષશ્ચ ખવર્ણામૃતમજ્જનઃ ।
ગણેશો ગુણમાર્ગેયો ગજરાજેશ્વરો ગણઃ ॥ ૪૪॥

અગુણઃ સગુણો ગ્રામ્યો ગ્રીવાલઙ્કારમણ્ડિતઃ ।

ગૂઢો ગૂઢાશયો ગુપ્તો ગણગન્ધર્વસેવિતઃ ॥ ૪૫॥

ઘોરનાદો ઘનશ્યામો ઘૂર્ણાત્મા ઘુર્ઘરાકૃતિઃ ।
ઘનવાહો ઘનેશાનો ઘનવાહનપૂજિતઃ ॥ ૪૬॥

ઘનઃ સર્વેશ્વરો જેશો ઘવર્ણત્રયમણ્ડનઃ ।
ચમત્કૃતિશ્ચલાત્મા ચ ચલાચલસ્વરૂપકઃ ॥ ૪૭॥

ચારુવેશશ્ચારુમૂર્તિશ્ચણ્ડિકેશશ્ચમૂપતિઃ ।
ચિન્ત્યોઽચિન્ત્યગુણાતીતશ્ચિતારૂપઃ ચિતાપ્રિયઃ ॥ ૪૮॥

ચિતેશશ્ચેતનારૂપશ્ચિતાશાન્તાપહારકઃ ।
છલભૃચ્છલકૃચ્છત્રી છત્રિકશ્છલકરકઃ ॥ ૪૯॥

છિન્નગ્રીવઃ છિન્નશીર્ષઃ છિન્નકેશઃ છિદારકઃ ।
જેતા જિષ્ણુરજિષ્ણુશ્ચ જયાત્મા જયમણ્ડલઃ ॥ ૫૦॥

જન્મહા જન્મદો જન્યો વૃજની જૃમ્ભણો જટી ।
જડહા જડસેવ્યશ્ચ જડાત્મા જડવલ્લભઃ ॥ ૫૧॥

જયસ્વરૂપો જનકો જલધિર્જ્વરસૂદનઃ ।
જલન્ધરસ્થો જનાધ્યક્ષો નિરાધિરાધિરસ્મયઃ ॥ ૫૨॥

અનાદિર્જગતીનાથો જયશ્રીર્જયસાગરઃ ।
ઝઙ્કારી ઝલિનીનાથઃ સપ્તતિઃ સપ્તસાગરઃ ॥ ૫૩॥

ટઙ્કારસમ્ભવો ટાણુઃ ટવર્ણામૃતવલ્લભઃ ।
ટઙ્કહસ્તો વિટઙ્કારો ટીકારો ટોપપર્વતઃ ॥ ૫૪॥

ઠકારી ચ ત્રયઃ ઠઃ ઠઃ સ્વરૂપો ઠકુરોબલી ।
ડકારી ડકૃતીડમ્બડિમ્બાનાથો વિડમ્બનઃ ॥ ૫૫॥

ડિલ્લીશ્વરો હિ ડિલ્લાભો ડઙ્કારાક્ષર મણ્ડનઃ ।
ઢવર્ણી ઢુલ્લિયઙ્ગેશો ઢમ્બસૂચી નિરન્તકઃ ॥ ૫૬॥

ણવર્ણી શોણિનોવાસો ણરાગી રાગભૂષણઃ ।
તામ્રાપસ્તપનસ્તાપી તપસ્વી તપસાં નિધિઃ ॥ ૫૭॥

તપોમયસ્તપોરૂપસ્તપસાં ફલદાયકઃ ।
તમીશ્વરો મહાતાલી તમીચરક્ષયઙ્કરઃ ॥ ૫૮॥

તપોદ્યોતિસ્તપોહીનો વિતાની ત્ર્યમ્બકેશ્વરઃ ।
સ્થલસ્થઃ સ્થાવરઃ સ્થાણુઃ સ્થિરબુદ્ધિઃ સ્થિરેન્દ્રિયઃ ॥ ૫૯॥

સ્થિરકૃતી સ્થિરપ્રીતિઃ સ્થિતિદઃ સ્થિતિવાંસ્તથા ।
દમ્ભી દમપ્રિયો દાતા દાનવો દાનવાન્તકઃ ॥ ૬૦॥ દાનવાન્યની?

ધર્માધર્મો ધર્મગતિર્ધનવાન્ધનવલ્લભઃ ।
ધનુર્ધરો ધનુર્ધન્યો ધીરેશો ધીમયો ધૃતિઃ ॥ ૬૧॥

ધકારાન્તો ધરાપાલો ધરણીશો ધરાપ્રિયઃ ।
ધરાધરો ધરેશાનો નારદો નારસોરસઃ ॥ ૬૨॥

સરસો વિરસો નાગો નાગયજ્ઞોપવીતવાન્ ।
નુતિલભ્યો નુતીશાનો નુતિતુષ્ટો નુતીશ્વરઃ ॥ ૬૩॥

પીવરાઙ્ગ પરાકારઃ પરમેશઃ પરાત્પરઃ ।
પારાવારઃ પરં પુણ્યં પરામૂર્તિઃ પરં પદમ્ ॥ ૬૪॥

પરોગમ્યઃ પરન્તેજઃ પરંરૂપઃ પરોપકૃત્ ।
પૃથ્વીપતિઃ પતિઃ પૂતિઃ પૂતાત્મા પૂતનાયકઃ ॥ ૬૫॥

પારગઃ પારદૃશ્વા ચ પવનઃ પવનાત્મજઃ ।
પ્રાણદોઽપાનદઃ પાન્થઃ સમાનવ્યાનદો વરમ્ ॥ ૬૬॥

ઉદાનદઃ પ્રાણગતિઃ પ્રાણિનાં પ્રાણહારકઃ ।
પુંસાં પટીયાન્પરમઃ પરમં સ્થાનકઃ પવિઃ ॥ ૬૭॥

રવિઃ પીતાનનઃ પીઠં પાઠીનાકૃતિરાત્મવાન્ ।
પત્રી પીતઃ પવિત્રં ચ પાઠનં પાઠનપ્રિયઃ ॥ ૬૮॥

પાર્વતીશઃ પર્વતેશઃ પર્વેશઃ પર્વઘાતનઃ ।
ફણી ફણિદ ઈશાનઃ ફુલ્લહસ્તઃ ફણાકૃતિઃ ॥ ૬૯॥

ફણિહારઃ ફણિમૂર્તિઃ ફેનાત્મા ફણિવલ્લભઃ ।
બલી બલિપ્રિયો બાલો બાલાલાપી બલન્ધરઃ ॥ ૭૦॥

બાલકો બલહસ્તશ્ચ બલિભુગ્બાલનાશનઃ ।
બલિરાજો બલકારી બાણહસ્તોઽર્ધવર્ણભૃત્ ॥ ૭૧॥

ભદ્રી ભદ્રપ્રદો ભાસ્વાન્ભામયો ભ્રમયોનયઃ ।
ભવ્યો ભાવપ્રિયો ભાનુર્ભાનુમાન્ભીમનન્દકઃ ॥ ૭૨॥

ભૂરિદો ભૂતનાથશ્ચ ભૂતલં સુતલં તલમ્ ।
ભયહા ભાવનાકર્તા ભવહા ભવઘાતકઃ ॥ ૭૩ ॥

ભવો વિભવદો ભીતો ભૂતભવ્યો ભવપ્રિયઃ ।
ભવાનીશો ભગેષ્ટશ્ચ ભગપૂજનપોષણઃ ॥ ૭૪ ॥

મકુરો માનદો મુક્તો મલિનો મલનાશનઃ ।
મારહર્તા મહોધિશ્ચ મહસ્વી મહતીપ્રિયઃ ॥ ૭૫ ॥

મીનકેતુર્મહામારો મહેષ્વા મદનાન્તકઃ ।
મિથુનેશો મહામોહો મલ્લો મલ્લાન્તકો મુનિઃ ॥ ૭૬ ॥

મરીચિઃ રુચિમાન્યોગી મઞ્જુલેશોઽમરાધિપઃ ।
મર્દનો મોહમર્દી ચ મેધાવી મેદિનીપતિઃ ॥ ૭૭ ॥

મહીપતિઃ સહસ્રારો મુદિતો માનવેશ્વરઃ ।
મૌની મૌનપ્રિયો માસઃ પક્ષી માધવ ઇષ્ટવાન્ ॥ ૭૮ ॥

મત્સરી માપતિર્મેષો  મેષોપહારતોષિતઃ ।
માણિક્યમણ્ડિતો મન્ત્રી મણિપૂરનિવાસકઃ ॥ ૭૯ ॥

મન્દમુન્મદરૂપશ્ચ મેનકી પ્રિયદર્શનઃ ।
મહેશો મેઘરૂપશ્ચ મકરામૃતદર્શનઃ ॥ ૮૦ ॥

યજ્વા યજ્ઞપ્રિયો યજ્ઞો યશસ્વી યજ્ઞભુગ્યુવા ।
યોધપ્રિયો યમપ્રિયો યામીનાથો યમક્ષયઃ ॥ ૮૧ ॥

યાજ્ઞિકો યજ્ઞમાનશ્ચ યજ્ઞમૂર્તિર્યશોધરઃ ।
રવિઃ સુનયનો રત્નરસિકો રામશેખરઃ ॥ ૮૨ ॥

લાવણ્યં લાલસો લૂતો લજ્જાલુર્લલનાપ્રિયઃ ।
લમ્બમૂર્તિવિલમ્બી ચ લોલજિહ્વો લુલુન્ધરઃ ॥ ૮૩ ॥

વસુદો વસુમાન્વાસ્તુવાગ્ભવો વટુકો વટુઃ ।
વીટીપ્રિયો વિટઙ્ગી ચ વિટપી વિહગાધિપઃ ॥ ૮૪ ॥

વિશ્વમોદી વિનયદો વિશ્વપ્રીતો વિનાયકઃ ।
વિનાન્તકો વિનાંશકો વૈમાનિકો વરપ્રદઃ ॥ ૮૫ ॥

શમ્ભુઃ શચીપતિઃ શારસમદો વકુલપ્રિયઃ ।

શીતલઃ શીતરૂપશ્ચ શાવરી પ્રણતો વશી ॥ ૮૬॥

શીતાલુઃ શિશિરઃ શૈત્યઃ શીતરશ્મિઃ સિતાંશુમાન્ ।
શીલદઃ શીલવાન્ શાલી શાલીનઃ શશિમણ્ડનઃ ॥ ૮૭॥

શણ્ડઃ શણ્ટઃ શિપિવિષ્ટઃ ષવર્ણોજ્જ્વલરૂપવાન્ ।
સિદ્ધસેવ્યઃ સિતાનાથઃ સિદ્ધિકઃ સિદ્ધિદાયકઃ ॥ ૮૮॥

સાધ્યો સુરાલયઃ સૌમ્યઃ સિદ્ધિભૂઃ સિદ્ધિભાવનઃ ।
સિદ્ધાન્તવલ્લભઃ સ્મેરઃ સિતવક્ત્રઃ સભાપતિઃ ॥ ૮૯॥

સરોધીશઃ સરિન્નાથઃ સિતાભશ્વેતનાસમઃ ।
સત્યપઃ સત્યમૂર્તિશ્ચ સિન્ધુરાજઃ સદાશિવઃ ॥ ૯૦॥

સદેશઃ સદનાસૂરિઃ સેવ્યમાનઃ સતાઙ્ગતિઃ ।
સતામ્ભાવ્યઃ સદાનાથઃ સરસ્વાન્સમદર્શનઃ ॥ ૯૧॥

સુસન્તુષ્ટઃ સતીચેતઃ સત્યવાદી સતીરતઃ ।
સર્વારાધ્યઃ સર્વપતિઃ સમયી સમયઃ સ્વયમ્ ॥ ૯૨॥

સ્વયમ્ભૂઃ સ્વયમાત્મીયઃ સ્વયમ્ભાવઃ સમાત્મકઃ ।
સુરાધ્યક્ષઃ સુરપતિઃ સરોજાસનસેવકઃ ॥ ૯૩॥

સરોજાક્ષનિષેવ્યશ્ચ સરોજદલલોચનઃ ।
સુમતિઃ કુમતિઃ સ્તુત્યઃ સુરનાયકનાયકઃ ॥ ૯૪॥

સુધાપ્રિયઃ સુધેશશ્ચ સુધામૂર્તિઃ સુધાકરઃ ।
હીરકો હીરવાંશ્ચૈવ હેતુઃ હાટકમણ્ડનઃ ॥ ૯૫॥

હાટકેશો હઠધરો હરિદ્રત્નવિભૂષણઃ ।
હિતકૃદ્ધેતુભૂતશ્ચ હાસ્યદો હાસ્યવક્ત્રકઃ ॥ ૯૬॥

હારો હારપ્રિયો હારી હવિષ્મલ્લોચનો હરિઃ ।
હવિષ્માન્હવિભુગ્વાદ્યો હવ્યં હવિર્ભુજાં વરઃ ॥ ૯૭॥

હંસઃ પરમહંસશ્ચ હંસીનાથો હલાયુધઃ ।
હરિદશ્વો હરિસ્તુત્યો હેરમ્બો લમ્બિતોદરઃ ॥ ૯૮॥

ક્ષમાપતિઃ ક્ષમઃ ક્ષાન્તઃ ક્ષુરાધારોઽક્ષિભીમકઃ ।
ક્ષિતિનાથઃ ક્ષણેષ્ટશ્ચ ક્ષણવાયુઃ ક્ષવઃ ક્ષતઃ ॥ ૯૯॥

ક્ષીણશ્ચ ક્ષણિકઃ ક્ષામઃ ક્ષવર્ણામૃતપીઠકઃ ।
અકારાદિ ક્ષકારાન્તા વિદ્યામાલાવિભૂષણઃ ॥ ૧૦૦॥

સ્વર વ્યઞ્જન ભૂષાઢ્યો હ્રસ્વ દીર્ઘ વિભૂષણઃ ।
ૐ ક્ષ્મૃં મહાભૈરવેશી ૐ શ્રીં ભૈરવપૂર્વકઃ ॥ ૧૦૧॥

ૐ હ્રીં વટુકભાવેશો ૐ હ્રીં વટુકભૈરવઃ ।
ૐ ક્લીં શ્મશાનવાસી ચ ૐ હ્રીં શ્મશાનભૈરવઃ ॥ ૧૦૨॥

મૈં ભદ્રકાલિકાનાથઃ ક્લીં ૐ હ્રીં કાલિકાપતિઃ ।
ઐં સૌઃ ક્લીં ત્રિપુરેશાનો ૐ હ્રીં જ્વાલામુખીપતિઃ ॥ ૧૦૩॥

ઐં ક્લીં સઃ શારદાનાથો ૐ હ્રીં માર્તણ્ડભૈરવઃ ।
ૐ હ્રીં સુમન્તુસેવ્યશ્ચ ૐ શ્રીં હ્રીં મત્તભૈરવઃ ॥ ૧૦૪॥

ૐ શ્રીં ઉન્મત્તચિત્તશ્ચ ૐ શ્રીં ઉં ઉગ્રભૈરવઃ ।
ૐ શ્રીં કઠોરદેશશ્ચ ૐ શ્રીં હ્રીં કઠોરભૈરવઃ ॥ ૧૦૫॥

ૐ શ્રીં કામાન્ધકધ્વંસી ૐ શ્રીં કામાન્ધભૈરવઃ ।
ૐ શ્રીં અષ્ટસ્વરશ્ચૈવ ૐ શ્રીં અષ્ટકભૈરવઃ ॥ ૧૦૬॥

ૐ શ્રીં હ્રીં અષ્ટમૂર્તિશ્ચ ૐ શ્રીં ચિન્મૂર્તિભૈરવઃ ।
ૐ હ્રીં હાટકવર્ણશ્ચ ૐ હ્રીં હાટકભૈરવઃ ॥ ૧૦૭॥

ૐ શ્રીં શશાङ્ક વદનઃ ૐ શ્રીં શીતલભૈરવઃ ।
ૐ શ્રીં શિવારુતશ્ચૈવ ૐ શ્રીં શારૂકભૈરવઃ ॥ ૧૦૮॥

ૐ શ્રીં અહંસ્વરૂપશ્ચ ૐ હ્રીં શ્રીમુણ્ડભૈરવઃ ।
ૐ શ્રીં મનોન્મનશ્ચૈવ ૐ શ્રીં મઙ્ગલભૈરવઃ ॥ ૧૦૯॥

ૐ શ્રીં બુદ્ધિમયશ્ચૈવ ૐ શ્રીં ભૈમ્બુદ્ધભૈરવઃ ।
ૐ શ્રીં ઐં ક્લીં નાગમૂર્તિઃ ૐ શ્રીં હ્રીં નાગભૈરવઃ ॥ ૧૧૦॥

ૐ શ્રીં ક્લીં કૂર્મમૂર્તિશ્ચ ૐ શ્રીં કૃકરભૈરવઃ ।
ૐ હ્રીં શ્રીં દેવદત્તશ્ચ ૐ શ્રીં ક્લીં દત્તભૈરવઃ ॥ ૧૧૧॥

ૐ હ્રીં ધનઞ્જયશ્ચૈવ ૐ શ્રીં ધનિકભૈરવઃ ।
ૐ શ્રીં હ્રીં રસરૂપશ્ચ ૐ શ્રીં રસિકભૈરવઃ ॥ ૧૧૨॥

ૐ શ્રીં સ્પર્શરૂપશ્ચ ૐ શ્રીં હ્રીં સ્પર્શભૈરવઃ ।
ૐ શ્રીં હ્રીં ક્લીં સ્વરૂપશ્ચ ૐ શ્રીં હ્રીં રૂપભૈરવઃ ॥ ૧૧૩॥

ૐ શ્રીં સત્ત્વમયશ્ચૈવ ૐ શ્રીં હ્રીં સત્ત્વભૈરવઃ ।
ૐ શ્રીં રજોગુણાત્મા ચ ૐ શ્રીં રાજસભૈરવઃ ॥ ૧૧૪॥

ૐ શ્રીં તમોમયશ્ચૈવ ૐ શ્રીં તામસભૈરવઃ ।
ૐ શ્રીં ધર્મમયશ્ચૈવ ૐ હીં વૈ ધર્મભૈરવઃ ॥ ૧૧૫॥

ૐ શ્રીં હ્રીં મધ્યચૈતન્યો ૐ શ્રીં ચૈતન્યભૈરવઃ ।
ૐ શ્રીં હ્રીં ક્ષિતિમૂર્તિશ્ચ ૐ હ્રીં ક્ષાત્રિકભૈરવઃ ॥ ૧૧૬॥

ૐ શ્રીં હ્રીં જલમૂર્તિશ્ચ ૐ હ્રીં જલેન્દ્રભૈરવઃ ।
ૐ શ્રીં પવનમૂર્તિશ્ચ ૐ હ્રીં પીઠકભૈરવઃ ॥ ૧૧૭॥

ૐ શ્રીં હુતાશમૂર્તિશ્ચ ૐ હ્રીં હાલાખભૈરવઃ ।
ૐ શ્રીં હ્રીં સોમમૂર્તિશ્ચ ૐ શ્રીં હ્રીં સૌમ્યભૈરવઃ ॥ ૧૧૮॥

ૐ શ્રીં હ્રીં સૂર્યમૂર્તિશ્ચ ૐ શ્રીં સૌરેન્દ્રભૈરવઃ ।
ૐ જૂં સઃ હંસરૂપશ્ચ હં સઃ જું ૐ મૃત્યઞ્જયઃ ।
ૐ ચત્વારિંશદધિકો ૐ શ્રીં અઘોરભૈરવઃ ॥ ૧૧૯॥

અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરેભ્યઃ ।
સર્વતઃ સર્વસર્વેભ્યો નમસ્તે રુદ્રરૂપેભ્યઃ ॥ ૧૨૦॥

ભૈરવેશોઽભયવરદાતા દેવજનપ્રિયઃ ।
ૐ શ્રીં હ્રીં ક્લીં ક્ષ્મ્યું દેવી વૈ અઘોરદર્શનઃ ॥ ૧૨૧॥

ૐ શ્રીં સૌન્દર્યવાન્દેવો ૐ અઘોરકૃપાનિધિઃ ।
સહસ્રનામ ઇતિ નામ્નાં સહસ્રં તુ અઘોરસ્ય જગત્પ્રભુઃ ॥ ૧૨૨॥

તવ ભક્ત્યા મયાખ્યાતં ત્રિષુ લોકેષુ દુર્લભમ્ ।
અપ્રકાશ્યમદાતવ્યં ગોપ્તવ્યં શરજન્મનઃ ॥ ૧૨૩॥

બલ્યં બલપ્રદં સ્તુત્યં સ્તવનીયં સ્તવોત્તમમ્ ।
પઠેદ્વા પાઠયેન્નિત્યં ધ્યાયેચ્ચેતસિ નિત્યશઃ ॥ ૧૨૪॥

અદ્રષ્ટવ્યમદીક્ષાય ગોપ્તવ્યં પશુસઙ્કટે ।
નાતઃ પરતરં કિઞ્ચિત્સર્વસ્વં નાસ્તિ મે હૃદિ ॥ ૧૨૫॥

પુણ્યદં પુણ્યમાત્મીયં સકલં નિષ્કલં પરમ્ ।
પઠેન્મન્ત્રી નિશીથે તુ નગ્નઃ શ્રીમુક્તકુન્તલઃ ॥ ૧૨૬॥

અનન્તં ચિત્સુધાકારં દેવાનામપિ દુર્લભમ્ ।
શક્ત્યા યુક્તો જપેન્નામ્નાં સહસ્રં ભક્તિપૂર્વકમ્ ॥ ૧૨૭॥

તત્ક્ષણાત્સાધકઃ સત્યં જીવન્મુક્તો ભવિષ્યતિ ।
ભૌમેઽર્કે શનિવારે તુ શ્મશાને સાધકઃ પઠેત્ ॥ ૧૨૮॥

સદ્યસ્તસ્ય સ્વયં દેવો વરદસ્તુ ભવિષ્યતિ ।
દશાવર્ત્તં પઠેદ્રાત્રૌ નદીતીરેષુ ધૈર્યવાન્ ॥ ૧૨૯॥

તસ્ય હસ્તે સદા સન્તિ ત્ર્યમ્બકસ્યાષ્ટસિદ્ધયઃ ।
મધ્યાહ્ને શિવરાત્રૌ ચ નિશીથે વિવિધે પઠેત્ ॥ ૧૩૦॥

ઇન્દ્રાદયઃ સુરગણા વશમેષ્યન્તિ નાન્યથા ।
ગુરૌ બ્રાહ્મમુહૂર્તે તુ પઠેદ્ભક્ત્યા ચ સાધકઃ ॥ ૧૩૧॥

યાવદિન્દ્રઃ સભામધ્યે તદગ્રે મૂકવત્ ભવેત્ ।
શુક્રે નદ્યા જલે મન્ત્રી પઠેન્નામ્નાં સહસ્રકમ્ ॥ ૧૩૨॥

તદાપ્રભૃતિ ત્રૈલોક્યં મોહમેષ્યતિ નાન્યથા ।
ભૌમે વનાન્તરે મન્ત્રી પઠેત્સન્ધ્યાનિધૌ તદા ॥ ૧૩૩॥

શત્રુઃ કાલસમાનોઽપિ મૃત્યુમેષ્યતિ નાન્યથા ।
ત્રિસન્ધ્યોદયકાલે તુ પઠેત્સાધકસત્તમઃ ॥ ૧૩૪॥

રમ્ભાદ્યપ્સરસઃ સર્વા વશમાયાન્તિ તત્ક્ષણાત્ ।
ભૌમે મધ્યાહ્નસમયે પઠેચ્ચ કૂપસન્નિધૌ ॥ ૧૩૫॥

સદ્યો દેવિ મહાન્તં કારિપુમુચ્ચાટયેદ્ધ્રુવમ્ ।
સદ્યસ્ત્રિવારં પઠેન્નામ્નાં સહસ્રમુત્તમમ્ ॥ ૧૩૬॥

ઇહલોકે ભવેદ્ભોગી પરે મુક્તિર્ભવિષ્યતિ ।
અર્કવારે સમાલિખ્ય ભૂર્જત્વચિ ચ સાધકઃ ॥ ૧૩૭॥

કુઙ્કુમાલક્તકસ્તૂરી ગોરોચન મનઃશિલાઃ ।
સર્વાદ્યૈર્વસુભિર્મન્ત્રી વેષ્ટયેત્તામ્રરજ્જુના ॥ ૧૩૮॥

ધારયેન્મૂર્ધ્નિ સદ્યસ્તુ લભેત્કામાન્યથેપ્સિતાન્ ।
પુત્રાન્દારાંશ્ચ લક્ષ્મીં ચ યશો ધર્મં ધનાનિ ચ ॥ ૧૩૯॥

લભતે નાત્ર સંશયઃ સત્યમેતદ્વચો મમ ।
વિનાનેન મહાદેવિ પઠેદ્યઃ કવચં શુભમ્ ॥ ૧૪૦॥

તસ્ય જીવં ધનં પુત્રાન્ દારાન્ભક્ષન્તિ રાક્ષસાઃ ।
વિનાનેન જપેત્ વિદ્યામઘોરસ્ય ચ સાધકઃ ॥ ૧૪૧॥

તસ્ય કોટિ જપં વ્યર્થં સત્યમેતદ્વચો મમ ।
બહુનાત્ર કિમુક્તેન સહસ્રાખ્યં સ્તવોત્તમમ્ ॥ ૧૪૨॥

યદ્ગૃહે વા જપેદ્યસ્તુ શ્રાવયેદ્વા શ઼ૃણોતિ યઃ ।
સ સ્વયં નીલકણ્ઠોઽહં તત્કલત્રં મહેશ્વરી ॥ ૧૪૩॥

ઇદં રહસ્યં પરમં ભક્ત્યા તવ મયોદિતમ્ ।
અત્યન્તદુર્લભં નાકે તથાત્યન્તં મહીતલે ॥ ૧૪૪॥

ભૂમૌ ચ દુર્લભં દેવિ ગોપનીયં દુરાત્મનઃ ।
અઘોરસ્ય મહાદેવિ તત્ત્વં પરમતત્ત્વકમ્ ॥ ૧૪૫॥

અતીવ મધુરં હૃદ્યં પરાપરરહસ્યકમ્ ।
વિના બલિં વિના પૂજાં ન રક્ષ્યઃ સાધકોત્તમઃ ॥ ૧૪૬॥

પઠનીયં દિવારાત્રૌ સિદ્ધયોઽષ્ટૌ ભવન્તિ હિ ।
ઇદં રહસ્યં પરમં રહસ્યાતિરહસ્યકમ્ ॥ ૧૪૭॥

અપ્રકાશ્યમદાતવ્યમવક્તવ્યં દુરાત્મને ।
યથેષ્ટફલદં સદ્યઃ કલૌ શીઘ્રફલપ્રદમ્ ॥ ૧૪૮॥

ગોપ્યં ગુપ્તતરં ગૂઢં ગુપ્તં પુત્રાય પાર્વતિ ।
ગોપનીયં સદાગોપ્યં ગોપ્તવ્યં ચ સ્વયોનિવત્ ॥ ૧૪૯॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે ભૈરવ-ભૈરવી સંવાદે
અઘોરમૂર્તિસહસ્રનામસ્તવઃ સમ્પૂર્ણઃ ॥

Encoded by Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Aghora Murti Sahasranama Stotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*